# Gururaja Saptatih

# ગુરુરાજસપ્તતિઃ

## Document Information

Text title : Gururaja Saptatih

File name : gururAjasaptatiH.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : shrI(paiNganADu)gaNapatishAstriNA

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 11, 2023

*sanskritdocuments.org*

# ગુરુરાજસપ્તતિઃ

વિજ્ઞાનૈકવદાન્યં વિબુધૈર્માન્યં કલેશમૂર્ધન્યમ્ ।
શ્રીમત્ત્યાગાધીશં ગુરું મખીશં ભજેતરામનિશમ્ ॥ ૧॥

યાગાનન્દિતદેવો રાગાદીનામગોચરસ્વાન્તઃ ।
વાગાલયાનનાબ્જસ્ત્યાગાધીશાભિધો ગુરુર્જયતિ ॥ ૨॥

ગદિતપદવાક્યમાનં ગલદભિમાનં ગભીરમહિમાનમ્ ।
શિષ્યાણાં દયમાનં ગુણભૂમાનં ગુરું ભજેઽમાનમ્ ॥ ૩॥

તરુણાવિવેકશૈલે સ્વરુણા તુલ્યા કવિત્વવિધિકલ્યા ।
ગુરુણા વિહિતા સુહિતા કરુણા કાચિત્ કરોતિ મયિ ખેલામ્ ॥ ૪॥

ન્યસ્તે વિષ્ટરવર્યે ધ્વસ્તેતરદુર્મતસ્થબુધચર્યે ।
શસ્તે ગુરુવરચરણે હસ્તે કૃત્વા કૃતાર્થ એષોઽહમ્ ॥ ૫॥

આશાજાઙ્ઘિકકીર્તિઃ પાશાપોહાવલોકનિજમૂર્તિઃ ।
ઈશાવતાર એકો ધીશાલી દેશિકેશ્વરો જયતિ ॥ ૬॥

દ્વૈતમતધ્વંસકરં કૈતવરહિતસ્વભાવજનસુલભમ્ ।
રૈતતિનિરાશહૃદયં નૈતમુદારં જહામિ ગુરુનાથમ્ ॥ ૭॥

ધીકીલાલજબન્ધૌ મૂકીભૂતપ્રતીપબુધઘૂકે ।
એકીભૂતદયૌઘે કોકીભૂયાન્મનો ગુરુવરાર્કે ॥ ૮॥

અવિરતહવિરાસ્વાદનઘુમુઘુમિતશ્વાસલમ્પટા ભૃઙ્ગાઃ ।
ઇતિ મતિવિતારિગલગતરુદ્રાક્ષં દેશિકેન્દ્રમદ્રાક્ષમ્ ॥ ૯॥

ધ્યાનારૂઢમહેશાજ્જ્ઞાનાનન્દામૃતૌઘઘનભાવાત્ ।
દૂના પરમતવિબુધાત્ કા નામ કથા પરત્ર ગુરુવર્યાત્ ॥ ૧૦॥

ત્રેતાગારનિવિષ્ટં પીતાત્મીયાવબોધસુખપૂરમ્ ।
ધૃતાખિલદુરિતૌઘં પાતાસ્મ્યક્ષ્ણા કદા નુ પરમગુરુમ્ ॥ ૧૧॥

દ્રાક્ષેક્ષુમાધુરીણામાક્ષેપકસૂક્તિકર્મસુ ધુરીણમ્ ।
ભ્રૂક્ષેપદાસભૂપં વીક્ષે વિજ્ઞાનશેવધિં કમપિ ॥ ૧૨॥

ભાસિતસિતતરભસિતભ્રાજિતવપુષે કવિત્વવિભવપુષે ।
વિદિતર્કૂસામકયજુષે વિનતિર્ગુરવે દય સમુદયજુષે ॥ ૧૩॥

દમ્ભાદિદૂરહૃદયં પુમ્ભાવાપન્નશારદાસદૃશમ્ ।
સમ્ભાવયામિ ચેતસિ તં ભાસા તુલિતચન્દ્રશિશુમૌલિમ્ ॥ ૧૪॥

વરતરબહુનિજશિષ્યં સુરગુરુલજ્જાકરસ્વવૈદુષ્યમ્ ।
વિદલિતધીકાલુષ્યં હૃદયે કલયન્ પરં ગુરુમતુષ્યમ્ ॥ ૧૫॥

વિદ્યા ખલુ દેયાનાં હૃદ્યા તદમૂં વિતીર્ય સાર્થાખ્યઃ ।
અદ્યાસૌ ગુરુમુખ્યશ્છિદ્યાદસ્માસુ દૃષ્ટિવૈમુખ્યમ્ ॥ ૧૬॥

કુણ્ઠિતકુમતગવિદ્વત્કુલગર્વં કૂલમુદ્વહકૃપૌઘમ્ ।
કુન્દાવભાસયશસં કુર્વે હૃદયે ગુરું કુટિલદૂરમ્ ॥ ૧૭॥

મોહં વિભિદ્ય સમ્યક્ સોઽહમ્બુદ્ધ્યા શિવં હૃદિ ભજન્તમ્ ।
દેહં ચ વિસ્મરન્તં કોઽહં કુક્ષિભરિર્ગુરું સ્તોતુમ્ ॥ ૧૮॥

શાન્તં શિવમિવ ભાન્તં પરિહતજાન્તં પલાયિતધ્વાન્તમ્ ।
કાન્તં વિમલસ્વાન્તં ભજે નિતાન્તં બુધીકૃતભ્રાન્તમ્ ॥ ૧૯॥

દાસાયિતાવનીપં જિતનલિનીપં યશોભૃતદ્વીપમ્ ।
ધ્વાન્તનિવહપ્રદીપં ધુતનતતાપં ભજે કમપિ દીપમ્ ॥ ૨૦॥

અજ્ઞાનાપ્રતિહરણં યજ્ઞાનાં સુહિતહિમકરાભરણમ્ ।
વિજ્ઞાનાર્થિષુ શરણં પ્રજ્ઞાનઘનં પ્રણૌમિ ગુરુચરણમ્ ॥ ૨૧॥

દોષાનુષઙ્ગદૂરા ભૂષા સર્વજ્ઞમૂર્ધ્નિ શુચિવેષા ।
એષા કાચન નિતરાં તોષાયાસ્માકમસ્તુ શશિલેખા ॥ ૨૨॥

પરિતઃ પરિહૃતપઙ્કો ભરિતો ભસિતાવદાતરુચિભારૈઃ ।
વર્જિતગર્જિતલેશો વર્ષતિ બોધં બલાહકઃ કોઽપિ ॥ ૨૩॥

મણ્ડિતચમ્પકગહનં ખણ્ડિતતમભેદવાદિજનકથનમ્ ।
દણ્ડિતમદાદિષડરિં પણ્ડિતમણિમાનતોઽસ્મિ પરમગુરુમ્ ॥ ૨૪॥

સ્પર્શિતભુજઙ્ગભીતિર્દર્શિતષડ્દર્શનસ્વવાગ્રીતિઃ ।
વિવિધં મેધં વિદ્વન્ વિદ્યાકેકી વિરાજતે કોઽપિ ॥ ૨૫॥

પ્રતિમતબુધકુલજૈત્રં પ્રથિતચ્છાત્રં પ્રસાદભૃતનેત્રમ્ ।
પ્રયતતમદિવ્યગાત્રં પ્રજ્ઞાપાત્રં ભજે કલુષદાત્રમ્ ॥ ૨૬॥

વિદ્યાપારાવારં વિમતવિદારં વિધેયસુખભારમ્ ।
ભૂમૌ કૃતાવતારં ગૌરીદારં ભજે ગુરુમુદારમ્ ॥ ૨૭॥

વિલસતિ ન બુધઃ પુરતઃ કવિરપિ કશ્ચિત્ તથાગ્રતો યસ્ય ।
ચિત્રચરિત્રઃ સોઽયં કુત્રચિદાસ્તે ગુરુર્મહતિ દેશે ॥ ૨૮॥

યશસા જિતવિધુબિમ્બં વેદાન્તામ્ભોજસારલોલમ્બમ્ ।
વ્રજિનવ્રજગિરિશમ્બં વિદ્યાલમ્બં ભજે તમવિલમ્બમ્ ॥ ૨૯॥

વિજ્ઞાનૌઘનિકાયં વિનષ્ટમાયં વિશુદ્ધજનગેયમ્ ।
કલિતમખસમ્પ્રદાયં ગુણસમુદાયં ગુરું રસાદાયમ્ ॥ ૩૦॥

વિહિતામ્નાયત્રાણાન્ વિરચિતવિદ્યાખ્યરત્નવિશ્રાણાન્ ।
કાનપિ વાણીપ્રાણાન્ કલયે ભસિતં સિત્તં સુબિભ્રાણાન્ ॥ ૩૧॥

નિજમહિમભરિતલોકં નિતરામુધત્તમોપહાલોકમ્ ।
વિમતભિદાધૃતયત્નં વિદ્યારત્નં વિરાજતે કિમપિ ॥ ૩૨॥

સ્ફારીભવત્સ્વવાચા દૂરિકૃતદુર્મતસ્થદુષ્ટગજઃ ।
પુણ્યે ચમ્પારણ્યે ખેલતિ વિજ્ઞાનકેસરી કશ્ચિત્ ॥ ૩૩॥

ગુરુરપિ કવિતાશાલી શુચિરપિ ભાસ્વાન્ વિભૂતિભરિતોઽપિ ।
સમ્પદિ નિરીહચેતાઃ સંવિત્પૂરઃ પ્રકાશતે કોઽપિ ॥ ૩૪॥

કલિના મર્મહતાનાં કર્મવરાણાં સ કશ્ચિદાલમ્બઃ ।
વિલસતિ ચમ્પકવિપિને વિતરન્ જ્ઞાનામૃતં વિનમ્રાણામ્ ॥ ૩૫॥

શિષ્ટાનાં સહકૃત્વા શિતયા બુદ્ધ્યા તુ જીવસહયુધ્વા ।
શ્રુતિનિવહપારદૃશ્યા રાજતિ યજ્વા સ મે મતાવૃજ્વામ્ ॥ ૩૬॥

વિબુધજનૈરપિ મૃગ્યં વિશિષ્ય ભૂપાલકાર્હણાયોગ્યમ્ ।
વિનતજનમાત્રભોગ્યં વિધિમહિલાયા વિરાજતે ભાગ્યમ્ ॥ ૩૭॥

ભિન્દાનમખિલવિશયં વિન્દાનં વિવિધશાસ્ત્રવાક્યાર્થમ્ ।
મન્દાનનુગૃહ્ણન્તં સ્પન્દાનન્તરિતચક્ષુરીક્ષે તમ્ ॥ ૩૮॥

કલિના મલિનસ્વાન્તૈર્ભ્રાન્તૈઃ સઞ્ચાલિતેન શીલેન ।

ગાઢં દૃઢ ઇતિ કલિતઃ પણ્ડિત એકઃ પરોરજા ભાતિ ॥ ૩૯॥

ભસ્મિતદુર્મતતૂલં ભવ્યયશઃ કૃતહરિદ્વરદુકૂલમ્ ।
જડતાસરિતઃ કૂલં જયતિ જગત્યાં મહસ્તુ ચિન્મૂલમ્ ॥ ૪૦॥

શ્રિતનન્દનસ્વભાવઃ શાખાશતભૂષિતો બુધશ્લાઘ્યઃ ।
કલ્પકભૂરુહ એકો જલ્પતિ જગતાં કલાઃ સમસ્તાશ્ચ ॥ ૪૧॥

અજ્ઞાતપરુષઘોષો વિજ્ઞાનાબ્ધિઃ પરેણ પુરુષેણ ।
વિલસિતનિજાન્તરોઽસૌ વિતરતિ કશ્ચિત્ સરસ્વતીં ભજતામ્ ॥ ૪૨॥

સમ્પૂર્ણશારદાગમસમ્પ્રાપ્તોલ્લાસભાસુરો જગતિ ।
એકો હિ રાજહંસો લોકોત્તર એજતે વિશુદ્ધાત્મા ॥ ૪૩॥

રક્ષન્ ક્ષમામજસ્રં તક્ષન્ દુર્વાદકેલિમાક્ષિપ્ય ।
અપથવિદૂરપ્રકૃતિર્નૃપ ઇવ કશ્ચિદ્ વિપશ્ચિદાભાતિ ॥ ૪૪॥

વિજ્ઞાનરાશિકોશં વિત્તનિરાશં વિરુદ્ધમતનાશમ્ ।
વિમલયશોભરિતાશં જિતવાગીશં શ્રયામિ ગુર્વીશમ્ ॥ ૪૫॥

ભસિતત્રિપુણ્ડ્રયુક્તં ભગવત્પૂજાવિધાનસંસક્તમ્ ।
પઠિતાતિપુણ્યસૂક્તં પણ્ડિતમેકં ભજે દિવાનક્તમ્ ॥ ૪૬॥

અદ્વૈતરાજધાનીદૃઢતરવપ્રં દિનેશમિવ દીપ્રમ્ ।
કલયે હૃદયે તમહં કરુણાભરિતં કલઙ્કહરચરિતમ્ ॥ ૪૭॥

દગ્ધેતરમતવાદસ્નિગ્ધે દયયા દૃશા ભૃશં કુર્વન્ ।
મુગ્ધે મયિ કોઽપિ ગુરુર્દુગ્ધે વિદ્યાવિશેષસર્વસ્વમ્ ॥ ૪૮॥

જિત્વરમખિલબુધાનાં સૃત્વરયશસં દિશાસુ નિખિલાસુ ।
સત્વરમુપૈમિ શરણં ગત્વરમૃજુના પથા ગુરુશ્રેષ્ઠમ્ ॥ ૪૯॥

જડતાલતાકૃપાણી જપાર્થમાલાવિલાસયુતપાણી ।
પીયૂષતુલ્યવાણી પિનષ્ટુ કાચિચ્છુચં કૃપાશ્રેણી ॥ ૫૦॥

વિત્તવિનિગ્રહયાલું વિનતદયાલું મતાવનિદ્રાલુમ્ ।
શાસ્ત્રેષ્વસંશયાલું પ્રણિપતયાલુર્ભવામિ તં પ્રાજ્ઞમ્ ॥ ૫૧॥

ક્ષેપિષ્ઠં કવિતાયાં ક્ષોદિષ્ઠદ્વૈતખણ્ડનવરિષ્ઠમ્ ।
કલયે મતિવર્ષિષ્ઠં કલુષદવિષ્ઠં કલાવતાં શ્રેષ્ઠમ્ ॥ ૫૨॥

નતજનકૃપાનુકમ્પં નામ્નૈવોદ્યત્પ્રતીપબુધકમ્પમ્ ।
યશસા દિશાસુ લિમ્પં હૃદયે કૃત્વા ગુરું શુચમલુમ્પમ્ ॥ ૫૩ ॥

કર્મવરકરણગૃધ્નુઃ કલુષત્રસ્નુઃ કદધ્વગક્ષિપ્નુઃ ।
કશ્ચન વાદે ધૃષ્ણુઃ કલયતિ વિહૃતિં સ ચમ્પકારણ્યે ॥ ૫૪ ॥

નિખિલજનેડ્યં કર્માનુષ્ઠાસ્નુર્નિગમસીમ્નિ નિષ્ઠાસ્નુઃ ।
ધિષણાયામગ્રસ્નુર્ધિનોતુ કશ્ચિદ્ધિયા ધિષણજિષ્ણુઃ ॥ ૫૫ ॥

જનાન્ધહ્વરણં સુભગહ્વરણં સુધોપમૈઃ સૂક્તૈઃ ।
નમતામાઢ્યઙ્કરણં જ્ઞાનાદ્વૈતં ચકાસ્તિ વિમપિ ભુવિ ॥ ૫૬ ॥

પરશિવસધ્રીચીનં વિષ્વદ્રીચીનવિમલકીર્તિભરમ્ ।
કલુષપરાચીનમતિં કલયે કઞ્ચિદ્ બુધં સમીચીનમ્ ॥ ૫૭ ॥

અદ્વૈતદ્રઢિમાનં ધીકૃશિમાનં ક્ષણેન ધુન્વાનમ્ ।
વિદ્વત્પરિબૃઢિમાનં વીક્ષે કઞ્ચિદ્વિશુદ્ધમહિમાનમ્ ॥ ૫૮ ॥

સુચરિતવિધિજીવાતુઃ સુધયા સહયુધ્વસૂક્તિરસપૂરઃ ।
વિધુસધ્રીચીનયશાઃ વિભાતિ કશ્ચિદ્વિપશ્ચિદગ્રણ્યઃ ॥ ૫૯ ॥

કરુણારસામ્બુધીનાં કલુષરિપૂણાં કનદ્યશોભૂમ્નામ્ ।
સતતં વરિવસિતાહં સારસ્વતસારજીવનાડીનામ્ ॥ ૬૦ ॥

નિગમપથસઞ્ચરિષ્ણુર્નિરાકરિષ્ણુર્નિકૃષ્ટમતઘોષમ્ ।
કાપથવિનિવર્તિષ્ણુઃ કલયતુ મેધાં ગુરુઃ પ્રરોચિષ્ણુઃ ॥ ૬૧ ॥

છવિભૂતિસ્ફુરદઙ્ગોઽપ્યચ્છવિભૂતિસ્ફુરચ્છરીરોઽયમ્ ।
કીર્તિભૃતોઽપિ વિશુદ્ધો ગુહ્યશ્ચિત્રીયતે ગુરૂત્તંસઃ ॥ ૬૨ ॥

વિબુધૈરખિલૈર્વન્દ્યઃ વિહિતપ્રીતિર્વિશિષ્ય ગણપતયે ।
વિજ્ઞાનદાનશૌણ્ડઃ કોઽપિ ગિરીશઃ કુતૂહલં કુરુતે ॥ ૬૩ ॥

સઙ્ક્ષુણ્ણતમસ્કાણ્ડઃ સભુવનજાતપ્રતીક્ષ્યનિજપાદઃ ।
નિખિલજગદ્બોધકરઃ નિસ્તુલતેજાશ્ચકાસ્તિ મિહિર ઇવ ॥ ૬૪ ॥

વાસર ઇવાસદક્ષઃ વારિદ ઇવ વર્ષિતામૃતસ્રોતાઃ ।
વાદે નિપુણશ્ચમ્પકવન્યામાસ્તે વદાવદઃ કશ્ચિત્ ॥ ૬૫ ॥

ક્ષીરમપિ ક્ષારતરં મોચા નીચા સુધાવિધાપિ મુધા ।
માક્ષિકમનીક્ષિકાર્હં કલિતે લલિતે ગિરો ગુરોઃ સારે ॥ ૬૬ ॥

ભાસ્વાન્ કલાધિનાથઃ મઙ્ગલરૂપો બુધો ગુરુશ્ચ કવિઃ ।
સૂર્યાનન્દનરૂપસ્તનુતે કશ્ચિન્મુદં તમઃ-કેતુઃ ॥ ૬૭॥

વિચનીકસીતિ મેધા વિસનીસ્રંસીતિ યેન જડતા ચ ।
તં પ્રણિપનીપતીમિ પ્રશ્રયભરિતઃ પ્રવેકમાર્યાણામ્ ॥ ૬૮॥

જ્ઞાનલવલાભમાત્રા ધન્યમ્મન્યૈરલં બુધૈરન્યૈઃ ।
વાઙ્મનસદૂરદૂરં વન્દે વિજ્ઞાનરાશિમેવ ગુરુમ્ ॥ ૬૯॥

જગદભિવન્દ્યાય નમો જડજનચૈતન્યવર્ષકાય નમઃ ।
નતજનસુલભાય નમો નિસ્તુલવિજ્ઞાનરાશયેઽસ્તુ નમઃ ॥ ૭૦॥

ઇતિ ગણપતિના કૃતિના ગુહ્યા ગુરુરાજસપ્તતિઃ કલિતા ।
લલિતારસભરમિલિતા પઠતાં ભક્ત્યા દદાતિ પાણ્ડિત્યમ્ ॥ ૭૧॥

વિજયે ચિરચિતવિજયે વિહિતા ગુરુરાજસપ્તતિઃ સેયમ્ ।
અહિમકરે પ્રેમકરે મકરે ચ કરે પરે બરે વારે ॥ ૭૨॥

ઇતિ શ્રી(પૈઙ્ગનાડુ)ગણપતિશાસ્ત્રિણા વિરચિતા ગુરુરાજસપ્તતિઃ સમ્પૂર્ણા ।
સ્તોત્રસમુચ્ચયઃ ૨ (૯૨)

Painnanadu Ganapatisastrin is a recent author (A.D. 1871-1913) and a reputed scholar, being a disciple of Mm. Mannargudi Rajusastrin ( alias Tyagarajamakhin) belonging to Appayadiksita's family. The Gururajasaptali (92) in Arya metre is on his Guru (Tyagarajamakhin).

Proofread by Rajesh Thyagarajan

*Gururaja Saptatih*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*